# shrIGaneshastavaraja from Bhavishyottara Purana

# શ્રીગણેશસ્તવરાજ ભવિષ્યોત્તરપુરાણે

## Document Information

Text title : gaNeshastavarAja bhaviShyapurANe

File name : gaNeshastavarAjabhaviShyapurANa.itx

Category : stavarAja, ganesha

Location : doc_ganesha

Transliterated by : Pranav and Vrushali Tendulkar pranav.tendulkar at gmail.com

Proofread by : Pranav and Vrushali Tendulkar pranav.tendulkar at gmail.com

Latest update : August 22, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

shrIGaneshastavaraja from Bhavishyottara Purana

# શ્રીગણેશસ્તવરાજ ભવિષ્યોત્તરપુરાણે

ૐ નમઃ શિવાય ॥

અથ શ્રી ગણેશસ્તવરાજઃ ॥

ૐ વિઘ્નેશો નઃ સ પાયાદ્વિહૃતિષુ જલધિ પુષ્કરાગ્રેણ પીત્વા
યસ્મિન્નુદ્ધૃત્ય હસ્તં વમતિ તદઽખિલં દૃશ્યતે વ્યોમ્નિ દેવૈઃ ।
ક્વાપ્યઽનન્તઃ ક્વચ શ્રીઃ ક્વાપ્યૌર્બઃ ક્વપિ શૈલઃ ક્વચન
મણિગણઃ ક્વાપિ નક્રાદિસત્વાઃ ॥

નિર્વિઘ્નવિશ્વનિર્માણસિદ્ધયે યદનુગ્રહમ્ ।
મન્યે સ વવ્રે ધાતાપિ તસ્મૈ વિઘ્નજિતે નમઃ ॥

સર્ગારમ્ભેઽપ્યજાતાય બીજરુપેણ તિષ્ઠતે ।
ધાત્રા કૃતપ્રણામાય ગણાધિપતયે નમઃ ॥

ગણેશાય નમઃ પ્રહ વવાઞ્છિતામ્બુજભાનવે ।
સિતદંષ્ટ્રાકુરસ્ફીતવિઘ્નૌઘતિમિરેન્દવે ॥

પ્રણમામ્યજમીશાનં યોગશાસ્ત્રવિશારદમ ।
નિઃશેષગણવૃન્દસ્ય નાયકં સુવિનાયકમ્ ॥

શ્રી બ્રહ્મોવાચ

ભગવચ્છ્રોતુમિચ્છામિ વિસ્તરેણ યથાયથમ ।
સ્તવરાજસ્ય માહાત્મયં સ્વરુપં ચ વિશેષતઃ ॥

શ્રી નન્દિકેશ્વર ઉવાચ

સ્તવરાજસ્ય માહાત્મયં પ્રવક્ષ્યામિ સમાસતઃ ।
શ ૃણુષ્વાવહિતો ભૂત્વા સર્વસિદ્ધિકરં પરમ્ ॥
કર્મણા મનસા વાચા યે પ્રપન્ના વિનાયકમ્ ।
તે તરન્તિ મહાઘોરં સંસારં કામવર્જિતાઃ ॥

સકૃચ્ચ જપ્ત્વા સ્તવરાજમુત્તમં તરત્યશેષં ભવપાશપઞ્જરમ્ ।
વિમુચ્યતે સંસૃતિસાગરાન્નરો વિભૂતિમાપ્નોતિ સુરૈઃ સુદુર્લભામ્ ॥
યત્ફલં લભતે જપ્ત્વા સ્વરુપં ચાપિ યાદૃશમ્ ।
યઃ પ્રાતરુત્થિતો વિદ્વાન્બ્રાહ્મો વાપિ મહૂર્તકે ॥
વિષુવાયનકાલેષુ પુણ્યે વા સમયાન્તરે ॥

સર્વદા વા જપઞ્જન્તુઃ સ્તવરાજં સ્તવોત્તમમ્ ।
યત્ફલં લભતે મર્ત્યઃ તચ્છૃણુષ્વ ચતુર્મુખ ॥

ગઙ્ગાપ્રવાહવત્તસ્ય વાગ્વિભૂતિર્વિજૃમ્ભતે ।
બૃહસ્પતિસમો બુધ્યા પુરન્દરસમઃ શ્રિયા ।
તેજસાદિત્યસઙ્કાશો ભાર્ગવેણ સમો નયે ॥

ધનદેન સમો દાને તથા વિત્તપરિગ્રહે ।
ધર્મરાજસમો ન્યાયે શિવભક્તો મયા સમઃ ॥

પ્રતાપે વહ્નિસઙ્કાશઃ પ્રસાદે શશિના સમઃ ।
બલેન મરુતા તુલ્યો ભવતા બ્રહ્માવર્ચસે ॥

સર્વતત્વાર્થવિજ્ઞાને મયાપિ સમતાં વ્રજેત્ ।
એવમેતત્ત્રિસન્ધ્યં વૈ જપન્સ્તવમનુત્તમમ ॥

સર્વાન્કામાન્નરઃ પ્રાપ્ય ભુક્ત્વા ભોગાન્યથેપ્સિતાન્ ।
સશરીરઃ સુરેન્દ્રસ્ય પદં ન્યસ્યતિ મૂર્ધનિ ॥

પ્રાપ્યાષ્ટગુણમૈશ્વર્યં ભુક્ત્વા ભોગાન્સુપુષ્કલાન્ ।
અક્ષયો વીતશોકશ્ચ નિરાતઙ્કો નિરામયઃ ॥

જરામરણનિર્મુક્તો વેદશાસ્ત્રાર્થકોવિદઃ ।
સિદ્ધચારણગન્ધર્વદેવવિદ્યાધરાદિભિઃ ॥

સંસ્તૂમાનો મુનિભિઃ શંસ્યમાનો દિનેદિને ।
વિચરત્યઽખિલાઁલ્લોકોન્બન્ધુવર્ગૈઃ સમં નરઃ ॥

એવં ચિરાય નિર્વાહ્ય દેવસ્યાનુચરોભવેત્ ।
સ્તવરજં સકૃજ્જપ્ત્વા મુચ્યતે સર્વકિલ્વષૈઃ ॥

સર્વસિદ્ધિમવાપ્નોતિ પુનાત્યાસપ્તમં કુલમ્ ।
નાશયેદ્વિઘ્નસઙ્ઘાતાંસ્તેન્ વૈનાયકં સ્મૃતમ્ ॥

સ્તવરાજમનુસ્મરઞ્જપન્હૃદયાગ્રે વિલિખન્પઠન્નપિ ।
સ સુરાસુરસિદ્ધચારણૈર્મુનિભિઃ પ્રત્યહમેવ પૂજ્યતે ॥

તરતિ ચ ભવચક્રં સર્વમોહં નિહન્તિ
  ક્ષિપતિ ચ પરવાદં માન્યતે બન્ધુવર્ગૈઃ ।
અખિલમપિ ચ લોકં ક્ષેમતામાશુ નીત્વા
  વ્રજતિ યતિભિરીડ્યં શાશ્વતં ધામ મર્ત્યઃ ॥

યો જપતિ સ્તવરાજમશોકઃ ક્ષેમતમં પદમેતિ મનુષ્યઃ ।
ચારણસિદ્ધસુરૈરભિવન્દ્યો યાતિ પદં પરમં સ વિમુક્તઃ ॥

જપેદ્યઃ સ્તવરાજાખ્યમિમં પ્રાતઃ સ્તવોત્તમમ્ ॥

તસ્યાપચારં ક્ષમતે સર્વદૈવ વિનાયકઃ ॥

સર્વાન્નિહન્તિ વૈ વિઘ્નાન્વિપદશ્ચ સમન્તતઃ ।
અશેષાભિર્ગણાધ્યક્ષઃ સમ્પદ્ભિરભિષિઞ્ચતિ ॥

અસ્ય ચ પ્રણતા લક્ષ્મીઃ કટાક્ષાનુવિધાયિની ।
કિં કરોમીતિ વૈ ભીત્યા પુરસ્તાદેવ તિષ્ઠતિ ॥

તસ્માન્નિઃશ્રેયસં ગન્તુમતિભક્ત્યા વિચક્ષણઃ ।
સ્તવરાજં જપેજ્જન્તુર્ધર્મકામાર્થસિદ્ધયે ॥

આધિવ્યાધ્યસ્ત્રશસ્ત્રાગ્નિતમઃપઙ્કાર્ણવાદિષુ ।
ભયેષ્વન્યેષુ ચાપ્યેતત્સ્મરન્મુક્તો ભવેન્નરઃ ॥

સ્તવરાજં સકૃજ્જપ્ત્વા માર્ગં ગચ્છતિ માનવઃ ।
ન જાતુ જાયતે તસ્ય ચૌરવ્યાઘ્રાદિભિર્ભયમ્ ॥

યથા વરિષ્ઠો દેવાનામશેષાણાં વિનાયકઃ ।
તથા સ્તવો વરિષ્ઠોયં સ્તવાનાં શમ્ભુભાવિતઃ ॥

અવતીર્ણો યદા દેવો વિઘ્નરાજો વિનાયકઃ ।
તદા લોકોપકારાર્થં પ્રોક્તોઽયં શમ્ભુના સ્વયમ્ ॥

વિનાયકપ્રિયકરો દેવસ્ય હૃદયઙ્ગમઃ ।
જપ્યઃ સ્તવોઽયં યત્નેન ધર્મકામાર્થસિદ્ધયે ॥

અસ્ય શ્રીમહાગણપતિસ્તવરાજમન્ત્રસ્ય શ્રી ઈશ્વર ઋષિઃ નાનાવૃત્તાનિ
છન્દાંસિ વિનાયકો દેવતા તત્પુરુષ ઇતિ બીજં એકદન્ત ઇતિ શક્તિઃ વક્રતુણ્ડ

ઇતિ કીલકં આત્મનો વાઙ્ગનઃકાયોપાર્જિતપાપનિવારણાર્થં
સર્વવિઘ્નનિવારણાર્થં ધર્મકામાર્થસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ।

ધ્યાનં

જેતું યસ્ત્રિપુરં હરેણ હરિણા વ્યાજાબ્દલેર્બન્ધને
સ્ત્રષ્ટું વારિરુહોદ્ભવેન બિધિના શેષેણ ધર્તું ધરામ્ ।
પાર્વત્યા મહિષાસુરપ્રમથને સિદ્ધાધિપૈર્મુક્તયે ધ્યાતઃ
પઞ્ચશરેણ લોકવિજયે પાયાત્સ નાગાનનઃ ॥

શ્રી ઈશ્વર ઉવાચ

ૐકારમમૃતં બ્રહ્મ શિવમક્ષરમવ્યયમ્ ।
યમામનાન્તિ વેદેષુ તં પ્રપદ્યે વિનાયકમ્ ॥

યતઃ પ્રવૃત્તિર્જગતાં યઃ સાક્ષી હૃદયસ્થિતઃ ।
આધારભૂતો વિશ્વસ્ય તં પ્રપદ્યે વિનાયકમ્ ॥

યસ્ય પ્રસાદાચ્છક્રાદ્યાઃ પ્રાણન્તિ નિમિષન્તિ ચ ।
પ્રવર્તકં તં લોકાનાં પ્રણમામિ વિનાયકમ્ ॥

શિખાગ્રે દ્વાદશાઙ્ગુલ્યે સ્થિતં સૂક્ષ્મતનું વિભુમ્ ।
યુઞ્જન્તિ યં મરીચ્યાદ્યાસ્તં નમામિ ગણાધિપમ્ ॥

લીલયા લોકરક્ષાર્થં દ્વિધાભૂતો મહેશ્વરઃ ।
યઃ સ્વયં જગતઃ સાક્ષી તં વન્દે દ્વિરદાનનમ્ ॥

વિઘ્નેશ્વરં વિધાતારં ધાતારં જગતામપિ ।
પ્રણમામિ ગણાધ્યક્ષં પ્રણતાર્તિવિનાશનમ્ ॥

ઉત્સઙ્ગતલ્પે યો દેવ્યા ભવાન્યાઃ ક્રીડતે વિભુ ।
બાલો હરન્મનસ્તસ્યાસ્તં પ્રપદ્યે વિનાયકમ્ ॥

વિધાય ભૂષણૈશ્ચિત્રૈર્વેશકર્મ મનોરમમ્ ।
યં દૃષ્ટ્વા પશ્યતીશાની તં પ્રપદ્યે વિનાયકમ્ ॥

લીલયા યઃ સૃજઁલ્લોકાન્ભિન્દન્નપિ મુહુર્મુહુઃ ।
સઙ્ક્રીડતે મહાસત્વસ્તં નતોઽસ્મિ ગણાધિપમ્ ॥

સિન્દૂરિતમહાકુમ્ભસ્તુઙ્ગદન્તઃ સુભૈરવઃ ।
ભિનત્તિ દૈત્યકરિણસ્તં વન્દે દ્વિરદાનનમ્ ॥

યસ્ય મૂર્તિ વ્રજન્ત્યાશુ મદામોદાનુષઙ્ગિણઃ ।
ભ્રમરાસ્તીવ્રસંરાવીસ્તં નમામિ વિનાયકમ્ ॥

ગમ્ભીરભીમનિનદં શ્રુત્વા યદ્બૃંહિતં ક્ષણાત્ ।
પતન્ત્યસુરનાગેન્દ્રાસ્તં વન્દે દ્વિરદાનનમ્ ॥

યો ભિનત્તિ ગિરીન્સર્વાનિઘોરનિર્ઘાતભૈરવૈઃ ।
રવૈઃ સન્ત્રાસજનનૈસ્તં વન્દે દ્વિરદાનનમ્ ॥

લીલયા પ્રહતા યેન્ પાદાભ્યાં ધરણી ક્ષણાત્ ।
સંશીર્યતે સશૈલૌઘા તં વન્દે ચણ્ડવિક્રમમ્ ॥

યત્કરાતાડનૈર્ભિન્નમમ્ભઃ શતસહસ્રધા ।
વિશીર્યતે સમુદ્રાણાં તં નતોઽસ્મિ ગણાધિપમ્ ॥

વિમુખા યત્ર દૃશ્યન્તે ભ્રષ્ટવીર્યાઃ પદચ્યુતાઃ ।
નિષ્પ્રભા વિબુધાઃ સદ્યસ્તં પ્રપદ્યે વિનાયકમ્ ॥

યદ્ભ્ પ્રણિહિતાં લક્ષ્મીં લભન્તે વાસવાદયઃ ।
સ્વતન્ત્રમેકં નેતારં વિઘ્નરાજં નમામ્યહમ્ ॥

યત્પાદપાંસુનિચયં વિભ્રાણા મણિમૌલિષુ ।
અમરા બહુ મન્યન્તે તં નતોઽસ્મિ ગણાધિપમ્ ॥

વેદાન્તગીતં પુરુષં વરેન્યમઽભયપ્રદમ્ ।
હિરણ્મયપુરાન્તઃસ્થં તમસ્મિ શરણં ગતઃ ॥
ચિત્સુધાનન્દસન્માત્રં પરાનન્દસ્વરુપિણમ્ ।
નિષ્કલં નિર્મલં સાક્ષાદ્વિનાયકમુપૈમિ તમ્ ॥

અનપાયં ચ સદ્ભુતં ભૂતિદં ભૂતિવર્ધનમ્ ।
નમામિ સત્યંવિજ્ઞાનમનન્તં બ્રહ્મરુપિણમ્ ॥

અનાદ્યન્તં મહાદેવપ્રિયપુત્રં મનોરમમ્ ॥

દ્વિપાનનં વિભું સાક્ષાદાત્માનં તં નમામ્યહમ્ ॥

વિશ્વામરેશ્વરૈર્વન્દ્યમાધારં જગતામપિ ।
પ્રણમામિ ગણાધ્યક્ષં પ્રણતાજ્ઞાનમોચનમ્ ॥

શિખાગ્રે દ્વાદશાઙ્ગુલ્યે સ્થિતં સ્ફટિકસન્નિભમ્ ।

ગોક્ષીરધવલાકારં પ્રણમામિ ગજાનનમ્ ॥

અનાધારં નવાધારમનન્તાધારસંસ્થિતમ્ ।
ધાતારં ચ વિધાતારં તમસ્મિ શરણં ગતઃ ॥

અનન્તદૃષ્ટિં લોકાદિમનન્તં વિદ્રુમપ્રભમ્ ।
અપ્રતર્ક્યમનિર્દેશ્યં નિરાલમ્બં નમામ્યહમ્ ॥

ભૂતાલયં જગદ્યોનિમણીયાંસમણોરપિ ।
સ્વસંવેદ્યમસંવેદ્યં વેદ્યાવેદ્યં નમામ્યહમ્ ॥

પ્રમાણપ્રત્યયાતીતં હંસમવ્યક્તલક્ષણમ્ ।
અનાવિલમનાકારં તમસ્મિ શરણં ગતઃ ॥

વિશ્વાકારમનાકારં વિશ્વાવાસમનામયમ્ ।
સકલં નિષ્કલં નિત્યં નિત્યાનિત્યં નમામ્યહમ્ ॥

સંસારવૈદ્યં સર્વજ્ઞં સર્વભેષજભેષજમ્ ।
આત્માનં સદસત્વ્યક્તં ધાતારં પ્રણમામ્યહમ્ ॥

ભ્રૂમધ્યે સંસ્થિતં દેવં નાભિમધ્યે પ્રતિષ્ઠિતમ્ ।
હૃન્મધ્યે દીપવત્સંસ્થં વન્દે સર્વસ્ય મધ્યગમ્ ॥

હૃત્પુણ્ડરીકનિલયં સૂર્યમણ્ડલનિષ્ઠિતમ્ ।
તારકાન્તરસંસ્થાનં તારકં તં નમામ્યહમ્ ॥

તેજસ્વિનં વિકર્તારં સર્વકારણકારણમ્ ।
ભક્તિગમ્યમહં વન્દે પ્રણવપ્રતિપાદિતમ્ ॥

અન્તર્યોગરતૈર્યુક્તૈઃ કલ્પિતૈઃ સ્વસ્તિકાસનૈઃ ॥

બદ્ધ્વં હૃત્કર્ણિકામધ્યે ધ્યાનગમ્યં નમામ્યહમ્ ॥

ધ્યેયં દુર્જ્ઞેયમદ્વૈતં ત્રયીસારં ત્રિલોચનમ્ ।
આત્માનં ત્રિપુરારાતેઃ પ્રિયસૂનું નમામ્યહમ્ ॥

સ્કન્દપ્રિયં સ્કન્દગુરું સ્કન્દસ્યાગ્રજમેવ ચ ।
સ્કન્દેન સહિતં શશ્વન્નમામિ સ્કન્દવત્સલમ્ ॥

નમસ્તે વિઘ્નરાજાય ભક્તવિઘ્નવિનાશિને ।
વિઘ્નાધ્યક્ષાય વિઘ્નાનાં નિહન્ત્રે વિશ્વચક્ષુષે ॥

વિઘ્નદાત્રેઽપ્યભક્તાનાં ભક્તાનાં વિઘ્નહારિણે ॥

વિઘ્નેશ્વરાય વીરાય વિઘ્નેશાય નમોનમઃ ॥

કુલાદ્રિમેરુકૈલાસશિખરાણાં પ્રભેદિને ।
દન્તભિન્નાભ્રમાલાય કરિરાજાય તે નમઃ ॥

કિરીટિને કુણ્ડલિને માલિને હારિણે તથા ।
નમો મૌઞ્જીસનાથાય જટિને બ્રહ્મચારિણે ॥

ડિણ્ડિમુણ્ડાય ચણ્ડાય નમોઽધ્યયનશીલિને ॥

વેદાધ્યયનયુક્તાય સામગાનપરાય ચ ।
ત્ર્યક્ષાય ચ વરિષ્ઠાય નમશ્ચન્દ્રશિખણ્ડિને ॥

કપર્દિને કરાલાય શઙ્કરપ્રિયસૂનવે ।
સુતાય હૈમવત્યાશ્ચ હર્ત્રે ચ સુરવિદ્વિષામ્ ॥

ઐરાવણાદિભિર્દિવ્યૈર્દિગ્ગજૈઃ સંસ્તુતાય ચ ।
સ્વબૃંહિતપરિત્રસ્તૈર્નમસ્તે મુક્તિહેતવે ॥

કૂષ્માણ્ડગણનાથાય ગણાનાં પતયે નમઃ ।
વજ્રિણારાધિતાયૈવ વજ્રિવજ્રનિવારિણે ॥

પૂષ્ણો દન્તભિદે સાક્ષાન્મરુતાં ભીષણાય ચ ।
બ્રહ્મણશ્ચ શિરોહર્ત્રે વિવસ્વદ્બન્ધનાય ચ ॥

અગ્નેશ્ચૈવ સરસ્વત્યા ઇન્દ્રસ્ય ચ બલચ્છિદે ।
ભૈરવાય સુભીમાય ભયાનકરવાય ચ ॥

વિભીષણાય ભીષ્માય નાગાભરણધારિણે ।
પ્રમત્તાય પ્રચણ્ડાય વક્રતુણ્ડાય તે નમઃ ॥

હેરમ્બાય નમસ્તુભ્યં પ્રલમ્બજઠરાય ચ ।
આખુવાહાય દેવાય ચૈકદન્તાય તે નમઃ ॥

શૂર્પકર્ણાય શૂરાય પરશ્વધધરાય ચ ।
સૃણિહસ્તાય ધીરાય નમઃ પાશાસિપાણયે ॥

ધારણાય નમસ્તુભ્યં ધારણાભિરતાય ચ ।
ધારણાભ્યાસયુક્તાનાં પુરસ્તાત્સંસ્તુતાય ચ ॥

પ્રત્યાહારાય વૈ તુભ્યં પ્રત્યાહારરતાય ચ ।
પ્રત્યાહારરતાનાં ચ પ્રત્યાહારસ્થિતાત્મને ॥

વિદ્યાધ્યક્ષાય દક્ષાય લોકાધ્યક્ષાય ધીમતે ।
ભૂતાધ્યક્ષાય ભવ્યાય ગણાધ્યક્ષાય તે નમઃ ॥

યોગપીઠાન્તરસ્થાય યોગિને યોગધારિણે ।
યોગિનાં હૃદિસંસ્થાય યોગગમ્યાય તે નમઃ ॥

ધ્યાનાય ધ્યાનગમ્યાય શિવધ્યાનપરાય ચ ।
ધ્યેયાનામપિ ધ્યેયાય નમો ધ્યેયતમાય ચ ॥

સપ્તપાતાલપાદાય સપ્તબ્દીપોરુજઙ્ઘિને ।
નમો દિગ્બાહવે તુભ્યં વ્યોમદેહાય તે નમઃ ॥

સોમસૂર્યાગ્નિનેત્રાય બ્રહ્મવિદ્યામદામ્ભસે ।
બ્રહ્માણ્ડકુણ્ડપીઠાય હૃદયાલાનકાય ચ ॥

જ્યોતિર્મણ્ડલપુચ્છાય હૃદ્યાલાનકાય ચ ।
ધ્યાનાર્દ્રબદ્ધપાદાય પૂજાધોરણધારિણે ॥

સોમાર્કબિમ્બઘણ્ટાય દિક્કરીન્દ્રવિયોગિને ।
આકાશસરસો મધ્યે ક્રીડાગહનશાલિને ॥

સુમેરુદન્તકોશાય પૃથિવીસ્થલગાય ચ ।
સુઘોષાય સુભીમાય સુરકુઞ્જરભેદિને ॥

હેમાદ્રિકૂટભેત્ત્રે ચ દૈત્યદાનવમર્દિને ।
ગજાકારાય દેવાય ગજરાજાય તે નમઃ ॥

બ્રહ્મણે બ્રહ્મરુપાય બ્રહ્મગોત્રેઽવ્યયાય ચ ।
બ્રહ્મઘ્ને બ્રહ્મણાયૈવ બ્રહ્મણઃ પ્રિયબન્ધવે ॥

યજ્ઞાય યજ્ઞગોપ્ત્રે ચ યજ્ઞાનાં ફલદાયિને ॥

યજ્ઞાહર્ત્રે યજ્ઞકર્ત્રે સર્વયજ્ઞમયાય ચ ।
સર્વનેત્રાધિવાસાય સર્વૈશ્વર્યપ્રદાયિને ।
ગુહાશયાય ગુહ્યાય યોગિને બ્રહ્મવાદિને ॥ ૧૦૦ ॥

ૐ ગં તત્પુરુષાય વિદ્મહે
વક્રતુણ્ડાય ધીમહિ તન્નો

દન્તી પ્રચોદયાત્ ॥

એકાક્ષરપરાયૈવ માયિને બ્રહ્મચારિણે ।
ભૂતાનાં ભુવનેશાનાં પતયે પાપહારિણે ॥

સર્વારમ્ભનિહન્ત્રે ચ વિમુખાનાં નિજાર્ચને ।
નમો નમો ગણેશાય વિઘ્નેશાય નમો નમઃ ॥

ત્રિપુરં દગ્ધુકામેન પૂજિતાય ત્રિશૂલિના ।
દયાશીલ દયાહાર દયાપર નમોઽસ્તુ તે ॥

વિનાયકાય વૈ તુભ્યં વિકૃતાય નમો નમઃ ।
નમસ્તુભ્યં જગદ્ધાત્રે નમસ્તુભ્યં વિયોગિને ॥

નમસ્તુભ્યં ત્રિનેત્રાય ત્રિનેત્રપ્રિયસૂનવે ।
સપ્તકોટિમહામન્ત્રૈર્મન્ત્રિતાવયવાય તે ॥

મન્ત્રાય નમ્ત્રિણાં નિત્યં મન્ત્રાણાં ફલદાયિને ।
લીલયા લોકરક્ષાર્થં વિભક્તનિજમૂર્તયે ॥

સ્વયં શિવાય દેવાય લોકક્ષેમાનુપાલિને ।
નમો નમઃ ક્ષમાભર્ત્રે નમઃ ક્ષેમતમાય ચ ॥

દયામયાય દેવાય સર્વભૂતદયાલવે ॥
દયાકર દયારુપ દયામૂર્તે દયાપર ॥
દયાપ્રાપ્ય દયાસાર દયાકૃતિરતાત્મક ॥

જગતાં તુ દયાકર્ત્રે સર્વકર્ત્રે નમો નમઃ ॥

નમઃ કારુણ્યદેહાય વીરાય શુભદન્તિને ।
ભક્તિગમ્યાય ભક્તાનાં દુઃખહર્ત્રે નમોઽસ્તુ તે ॥

નમઃ સમસ્તગીર્વાણવન્દિતાઙ્ઘ્રિયુગાય તે ।
જગતાં તસ્થુષાં ભર્ત્રે વિઘ્નહર્ત્રે નમોઽસ્તુ તે ॥

નમો નમસ્તે ગણનાયકાય
સુનાયકાયાખિલનાયકાય ।
વિનાયકાયાભયદાયકાય
નમઃ શુભાનામુપનાયકાય ॥

ગણાધિરાજાય ગણાનુશાસ્ત્રે

ગજાધિરાજાય ગજાનનાય ।
શતાનનાયામિતમાનનાય
નમો નમો દૈત્યવિનાશનાય ॥

અનામયાયામલધીમયાય ।
સ્વમાયયાવિષ્ટજગન્મયાય ।
અમેયમાયાવિકસન્મયાય
નમો નમસ્તેઽસ્તુ મનોમયાય ॥

નમસ્તે સમસ્તાધિનાથાધિકર્ત્રે
નમસ્તે સમસ્તોરુવિસ્તારભાજે ।
નમસ્તે સમસ્તાધિકાયાતિભૂમ્ને
નમસ્તે પુનર્વ્યસ્તવિન્યસ્તધામ્ને ॥

પાત્રે સુરાણાં પ્રમથેશ્વરાણાં
શાસ્ત્રેઽનુશાસ્ત્રે સચરાચરસ્ય ।
નેત્રે પ્રનેત્રે ચ શરીરભાજાં
ધાત્રે વરાણાં ભવતે નમોઽસ્તે ॥

નમોઽસ્તુ તે વિઘ્નવિનાશકાય
નમોઽસ્તુ તે ભક્તભયાપહાય ।
નમોઽસ્તુ તે મુક્તમનસ્થિતાય
નમશ્ચ ભૂયો ગણનાયકાય ॥

અખિલભુવનભર્ત્રે સમ્પદામેકદાત્રે
નિખિલતિમિરભેત્ત્રે નિષ્કલાયાવ્યયાય ।
પ્રણતમનુજગોપ્ત્રે પ્રાણિનાં ત્રાણકર્ત્રે
સકલવિબુધશાસ્ત્રે વિશ્વનેત્રે નમોઽસ્તુ ॥

દશનકુલલિશભિન્નૈર્નિર્ગતૈર્દિગ્ગજાનાં
વિલસિતશુભદન્તં મૌક્તિકૈશ્ચન્દ્રગૌરૈઃ ।
ભવન્મુપસરન્તં પ્રેક્ષ્ય ગૌરી ભવન્તં
સુદૃઢમથ કરાભ્યાં શ્લિષ્યતે પ્રેમનુન્ના ॥

મૃદુનિ લલિતશીતે તલ્પરઙ્ગે ભવાન્યાઃ
શુભવિલસિતભાવાં નૃત્યલીલાં વિધાય ।
અચલદુહિતુરઙ્કાદઙ્કમન્યં વિસર્પન્-

પિતુરુપહરસિ ત્વં નૃત્યહર્ષોપહારમ્ ॥

ભુજગવલયિતેનોપસ્પૃશ્યપાણિના ત્વાં
સરભસમથ બાહ્વોરન્તરાલે નિવેશ્ય ।
કલમધુરસુગીતં નૃત્તમાલોકયંસ્તે
કલમડવિકલતાલં ચુમ્બતે હસ્તેપદ્મે ॥

કુવલયશતશીતૈર્ભૂરિકલ્હારહૃદ્યૈઃ
તવ મુહુરપિ ગાત્રસ્પર્શનૈઃ સમ્પ્રહૃષ્યન્ ।
ક્ષિપતિ ચ સુવિશાલે સ્વાઙ્કમધ્યે ભવન્તં
તવ મુહુરનુરાગાન્મૂર્ધ્નિ જિઘ્રન્મહેશઃ ॥

બાલોઽબાલપરાક્રમઃ સુરગણૈઃ સમ્પ્રાર્થ્યસેઽહર્નિશં
ગાયન્કિમ્પુરુષઙ્ગનાવિરચિતૈઃ સ્તોત્રૈરભિષ્ટૂયસે ।
હાહાહૂહુકતુમ્બુરુપ્રભૃતિભિસ્ત્વં ગીયસે નારદ
સ્તોત્રૈરદ્ભુતચેષ્ટિતૈઃ પ્રતિદિનં પ્રોદ્ઘોષસે સામભિઃ ॥

ત્વાં નમન્તિ સુરસિદ્ધચારણા-
સ્ત્વાં યજન્તિ નિખિલા દ્વિજાતયઃ ।
ત્વાં પઠન્તિ મુનયઃ પુરાવિદ-
સ્ત્વાં સ્મરન્તિ યતયઃ સનાતનાઃ ॥

પરં પુરાણં ગુણિનં મહાન્તં
હિરણ્મયં પુરુષં યોગગમ્યમ્ ।
યમામનન્ત્યાત્મભુવં મનીષિણો
વિપશ્ચિતં કવિમપ્યક્ષયં ચ ॥

ગણાનાન્ત્વા ગણનાથં સુરેન્દ્રં
કવિં કવીનામતિમેધ્યવિગ્રહમ્ ।
જ્યેષ્ઠરાજમૃષભં કેતુમેકમાનઃ
શ ૃણ્વન્નૂતિભિઃ સીદ શશ્વત્ ॥

નમો નમો વાઙ્મનસાતિભૂમયે
નમો નમો વાઙ્મનસૈકભૂતયે ।
નમો નમોનન્તસુખૈકદાયિને
નમો નમોનન્તસુખૈકસિન્ધવે ॥

નમો નમઃ શાશ્વતશાન્તિહેતવે
ક્ષમાદયાપૂરિતચારુચેતસે ।
ગજેન્દ્રરુપાય ગણેશ્વરાય તે
પરસ્ય પુંસઃ પ્રથમાય સૂનવે ॥

નમો નમઃ કારણકારણાય તે
નમો નમો મઙ્ગલમઙ્ગલાત્મને ।
નમો નમો વેદવિદાં મનીષિણા-
મુપાસનીયાય નમો નમો નમઃ ॥ ૩॥

શ્રી ઈશ્વર ઉવાચ

વૈનાયકં સ્તવં પુણ્યં સર્વપાપપ્રણાશનમ્ ।
ચિન્તાશોકપ્રશમનમાયુરારોગ્યવર્ધનમ્ ॥

નૃપાણાં સતતં રક્ષા દ્વિજાનાં ચ વિશેષતઃ ।
સ્તવરાજ ઇતિ ખ્યાતં સર્વ સિદ્ધિકરં પરમ્ ॥

યઃ પઠેચ્છૃણુયાદ્વાપિ સર્વપાપૈઃ પ્રમુચ્યતે ।
રુપં વીર્યં બલં પ્રજ્ઞાં યશશ્ચાયુઃ સમન્વિતમ્ ॥

મનીષાં સિદ્ધિમારોગ્યં શ્રિયમપ્યક્ષયિષ્ણુતામ્ ।
સર્વલોકાધિપત્યં ચ સર્વદેવાધિરાજતામ્ ॥

પ્રાપ્યાષ્ટગુણમૈશ્વર્યં ચ સર્વદેવાધિરાજતામ્ ॥

પ્રાપ્યાષ્ટગુણમૈશ્વર્યં પ્રાપ્ય ભૂતિં ચ શાશ્વતીમ્ ।
ઉદ્ધૃત્યાસપ્તમં વંશં દુસ્તરાદ્ભવસાગરાત્ ॥

કાઞ્ચનેન વિમાનેન શતનામાયુતેન ચ ।
વિચરત્યખિલાઁલ્લોકાન્સશરીરો ગણાધિપઃ ॥

ભત્પ્રિશ્ચ ભવેન્મર્ત્યઃ સર્વદેવપ્રિયઃ સદા ।
પ્રિયૌ વિનાયકસ્યાપિ પ્રિયોસ્માકં વિશેષતઃ ॥

સઙ્કલ્પસિદ્ધઃ સર્વજ્ઞઃ સર્વભૂતહિતે રતઃ ।
સ્તવરાજં જપન્મર્ત્યઃ સુહૃદ્ભિઃ સહ મોદતે ॥

સ્તવરાજજપાસક્તભાવયુક્તસ્ય ધીમતઃ ।
અસ્મિઞ્જપન્ત્રયેપ્યસ્તિ નાસાધ્યં ન ચ દુષ્કરમ્ ॥

તસ્માત્સર્વપ્રયત્નેન સ્તવરાજં જપેન્નરઃ ।
સકૃજ્જપ્ત્વા લભેન્મુક્તિં દુઃસ્વપ્નેષુ ભયેષ્વપિ ॥

સર્વં તરતિ પાપ્માનં બ્રહ્મભૂતો ભવેન્નરઃ ।
તસ્માત્સમ્પૂજિતો હ્યેષ ધર્મકામાર્થસિદ્ધયે ॥

સ્તવરાજમિમં સ્તવોત્તમં
પ્રલપંશ્ચૈવ પઠન્સ્મરન્નપિ ।
કુરુતે શુભકર્મ માનવઃ
શુભમભ્યેતિ શુભાનિ ચાશ્નુતે ॥

બહુનાત્ર કિમુક્તેન સ્તવરાજમિમં જપન્ ।
સર્વં તદ્ભદ્રમાપ્નોતિ યદ્યદિચ્છતિ શાશ્વતમ્ ॥

સ્તવાનામપ્યશેષાણાં વરિષ્ઠોયં યતઃ સ્તવઃ ।
સ્તવરાજ ઇતિ ખ્યાતિં સર્વલોકેષુ યાસ્યતિ ॥

શ્રીનન્દિકેશ્વર ઉવાચ ।
ઇત્થમેષં સ્તવઃ પ્રોક્તઃ પ્રશસ્તઃ શમ્ભુનાસ્વયમ્ ।
સર્વસિદ્ધિકરો નૃણાં સર્વાભીષ્ટફલપ્રદઃ ॥

તસ્માદનેન સ્તોત્રેણ સ્તવરાજેન માનવઃ ।
સ્તવઞ્જપન્સ્મરન્વાપિ કુર્વન્નિર્વાણમૃચ્છતિ ॥

એવં તે કથિતં હ્યેતત્ક્રમેણ પરિપૃચ્છતઃ ।
વિનાયકસ્ય માહાત્મ્યં પ્રતિષ્ઠાર્ચનયોર્વિધિઃ ॥

પ્રશંસા બ્રહ્મગાયત્ર્યાઃ કલ્પસ્તસ્યાશ્ચ શોભનઃ ।
ઉક્તમેતત્પરં બ્રહ્મ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥

ઇતિ વિરચયતિ સ્મ ત્ર્યમ્બકઃ
સ્તોત્રમેતદ્વરમિભવદનસ્ય સ્વામિનોઽત્યાદરેણ ।
ગુરુવરચરણાગ્રાન્મૂર્ધ્નિ કૃત્વા વરાજ્ઞાં
પઠિતમિહ વરેણ્યં ઘોરવિઘ્નૌઘશાન્ત્યૈ ॥

લાક્ષાસિન્દૂરવર્ણં સુરવરનમિતં
મોદકર્મોદિતાસ્યં
હસ્તે દન્તં દદાનં દિનકરસદૃશં
તેજસોગ્રં ત્રિનેત્રમ્ ।

દક્ષે રત્નાક્ષસૂત્રં વરપરશુધરં
સાખુસિંહાસનસ્થં
ગાઙ્ગેયં રૌદ્રમૂર્તિં ત્રિપુરવધકરં
વિઘ્નભક્ષં નમામિ ॥

નમતાશેષવિઘ્નૌઘવારણં વારણાનનમ્ ।
કારણં સર્વસિદ્ધીનાં દુરિતાર્ણવતારણમ્ ॥

શઙ્કર જગદમ્બિકયોરઙ્કે પઙ્કેન ખેલન્તમ્ ।
લમ્બોદરમવલમ્બે સ્તમ્ભેરમરાજચારુમુખમ્ ॥

ઇતિ શ્રીભવિષ્યોત્તર ઉત્તરખણ્ડે
નન્દિકેશ્વરસંવાદે ગણેશસ્તવરાજઃ
સમ્પૂર્ણઃ ॥

From Bhavishyottarapurana.

Encoded and proofread by
Pranav and Vrushali Tendulkar

*shrIGaneshastavaraja from Bhavishyottara Purana*
pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*